# सङ्घे शक्तिः

कस्यचित् वृद्धस्य चत्वारः पुत्राः आसन्। ते सदा परस्परं कलहायमाना आसन्। बहुधा प्रयतमानोऽपि सः वृद्धः तेषु परस्परप्रीतिं कल्पयितुं अशक्तः अभवत्। कदाचित् सः वृद्धः मरणतल्पे अवर्तत। पुत्राः सर्वे तत्तल्पस्य परिसरे आसन्। वृद्धः तेषु कंचित् आहूय 'काष्ठबन्धं एकं आनय' इति आज्ञापयत्। सः तथैव काष्ठबन्धं आहरत्।

वृद्धः पुत्रेषु एकैकं आहूय, "काष्ठबन्धं एनं भञ्जय" इत्युवाच।

किन्तु, कोपि तं भञ्जयितुं न अशक्नोत्।

ततः सः वृद्धः, 'तं काष्ठबन्धं उन्मुच्य एकैकं काष्ठं भञ्जयत' इत्यवोचत्।

तेषु एकैकोपि एकैकं काष्ठमादाय क्षिप्रं, विना श्रमेण

अभञ्जयत्। तदा वृद्धः अवदत्, "पुत्राः!

एकैकं काष्ठं युष्माभिः सुलभतया भग्नम्; न काष्ठबन्धः। अतः यूयं सदा सङ्घीभवत। तदा न कोऽपि युष्मान् बाधेत" इति। एवं सङ्घे शक्तिं तेभ्यः अबोधयत्।